# उत्तर मध्यमा द्वितीय खंड

## संस्कृतसाहित्यम् प्रश्नबैंक

1. कालिदासः स्वीये महाकाव्ये अलङ्कारं बहुत्र योजयति । (उत्प्रेक्षा, यमक, उपमा, श्लेषः) - उपमा
2. रघुवंशे कति सर्गाः सन्ति । (विंशतिः, द्वाविंशतिः, एकोनविंशतिः, दश) - एकोनविंशतिः
3. वागर्थाविव इति पदम् अस्ति । (तिङन्तम्, कृदन्तम्, प्रातिपदिकम्, समासान्तम्) - समासान्तम्
4. रघुवंशमहाकाव्ये मल्लिनाथस्य टीकायाः नाम अस्ति । (लोचनम्, सञ्जीवनी, पञ्जिका) - सञ्जीवनी
5. पूज्यपूजाव्यत्तिक्रमः किं बध्नाति । (धनम्, वयः, मोक्षः, श्रेयः) - श्रेयः
6. जगतः पितरौ.......वर्णितौ कविना । (सम्पृक्तौ, दयावन्तौ, मङ्गलकारकौ) - मङ्गलकारकौ
7. महाकविभारवेः कृतिसंख्या का । (तिस्त्रः, एका एव, द्वे) - एका एव
8. किरातवेशधारी कः अस्ति। (अर्जुनः, भीमः, त्र्यम्बकः) - त्र्यम्बकः
9. भारवेः किं प्रसिद्धमस्ति । (पदलालित्यम्, अर्थगौरवम्, पाण्डित्यम्) - अर्थगौरवम्
10. वर्णिलिङ्गी पदस्य अर्थः अस्ति। (वनेचरः, ब्रह्मचारी, गुप्तचरः) - ब्रह्मचारी
11. प्रजासु इत्यस्य सप्तम्यन्तस्य पदस्य अर्थः । (जनेषु विषये, जनेषु मध्ये, जनेषु अन्तः) - जनेषु अन्तः
12. बलवद्विरोधिता वर्णिता। (सान्ता, दुरन्ता, निकटान्ता) - दुरन्ता
13. कस्मिन् सर्गे दर्शनप्रावीण्यं प्रमाणयति कविः श्रीहर्षः। (सप्तदशसर्गे, नवमसर्गे, एकादशसर्गे) - सप्तदशसर्गे

14. दमयन्ती कस्य राज्यस्य पुत्री आसीत्। (विदर्भस्य, निषधस्य, मगधस्य) - विदर्भस्य

15. श्रीहर्षस्य पितुर्नाम आसीत्। (विजयचन्द्रः, श्रीहीरपण्डितः, गोवर्धनदासः) - श्रीहीरपण्डितः

16. टीकायां प्रदत्तः 'क्षितिरक्षिणः' पदस्य अर्थः अस्ति। (क्ष्मापालस्य, धनपालस्य, धर्मपालस्य) - क्ष्मापालस्य

17. कालं न प्रतीक्षते। (दया, आर्तिः, मृत्युः) - आर्तिः

18. शिशुपालवधस्य कथानकस्य स्रोतः वर्तते। (भागवतम्, शिवपुराणम्, महाभारतम्) - महाभारतम्

19. माघस्य स्थितिकालः वर्तते। (675-750, 500-550, 700) - 675-750

20. माघे गुणाः सन्ति। (नव, सप्त, त्रयः) - त्रयो गुणाः

21. जगन्निवासः इत्यत्र समासः। (कर्मधारयः, बहुव्रीहिः, षष्ठीतत्पुरुषः) - षष्ठीतत्पुरुषः

22. मुनिम् इत्यनेन मुनिः सूचितः। (व्यासः, नारदः, कश्यपः) - नारदः

23. अवतरन्तं मुनिं ...... ददर्श। (माघः, शिवः, हरिः) - हरिः

24. कालिदासकविता कान्तेव कान्ते रता एतत् वचनं मते अस्ति। - (दिवाकरस्य, मल्लिनाथस्य, वल्लभदेवस्य) - दिवाकरस्य

25. अलकानगर्याः वर्णनम् अस्ति। (समस्ते मेघदूते, उत्तरमेघे, पूर्वमेघे) - उत्तरमेघे

26. यक्षस्य शापस्य मर्यादा आसीत्। (वर्षम्, चत्वारः मासाः, वर्षाकालः) - वर्षम्

27. अस्तङ्गमितमहिमा पदे लिङ्गम् अस्ति। (नपुंसकलिङ्गम्, पुंल्लिङ्गम्, स्त्रीलिङ्गम्) - स्त्रीलिङ्गम्

28. मेघदूते सर्वत्र छन्दसः प्रयोगोऽस्ति। (मन्दाक्रान्तायाः, स्रग्धरायाः, मालिन्याः) - मन्दाक्रान्तायाः

29. चम्पूरामायणस्य शैली वर्तते। (गौड़ी, वैदर्भी, पद्यात्मिका) - वैदर्भी

30.भोजप्रबन्धः कृतिर्वर्तते। (बल्लालसेनस्य, भोजराजस्य, कालिदासस्य) - बल्लालसेनस्य

31. चम्पूरामायणस्य मङ्गलाचरणे. क्रियाविशेषणं प्रयुक्तमस्ति। (शीघ्रम्, इतरानपेक्षम्, निगमशाखिशिखाप्रवालम्) - निगमशाखिशिखाप्रवालम्

32.डम्बरशब्दस्य अर्थः। (सौभाग्यातिशयसंरम्भः, सौभाग्यम्, सौभाग्यस्य समारम्भः) - सौभाग्यातिशयसंरम्भः

33.महीसुराः भवन्ति। (क्षत्रियाः, गुरवः, ब्राह्मणाः) - ब्राह्मणाः

34.कवीनां निकषं अस्ति। (काव्यम्, पद्यम्, गद्यम्) - गद्यम्

35.दण्डिनः अपरा कृतिः वर्तते। (काव्यादर्शः, दशरुपकम्, काव्यमीमांसा) - काव्यादर्शः

36.दण्डिनः जन्मस्थलं अस्ति। (उज्जयिनी, काञ्जीवरम्, काशी) - काञ्जीवरम्

37. राजवाहनस्य पिता आसीत्। (राजहंसः, धर्मपालः, पोद्भवः) - राजहंसः

38.शतधृतिः................ अस्ति। (विष्णुः, शिवः, ब्रह्मा) - ब्रह्मा

39.शिवराजविजयस्य काव्यप्रकारः अस्ति ? (कथा, आख्यायिका, उपन्यासः) - उपन्यासः

40. शिवराजविजयस्य कर्ता कः अस्ति ? (अम्बिकादत्तव्यासः, भोजराज, रामचन्द्रः) - अम्बिकादत्तव्यासः

41. शिवराजविजये सम्मिल्य कति निश्वासाः सन्ति ? (12, 16, 3) - 12

42.शिवराजविजयस्य प्रारंभे कविना कस्य पुराणस्य वचने उद्धृते स्तः ? (शिवपुराणस्य, भागवतस्य, विष्णुपुराणस्य) - भागवतस्य

43.मरीचिमाली अस्ति ? (भगवान्, सूर्यः, ब्रह्मा) - सूर्यः

44.हर्षचरितस्य काव्यप्रकारः वर्तते। (कथा, आख्यायिका, उपन्यासः) - आख्यायिका

45.गोवर्धनाचार्यः कविं बाणं रूपेण वर्णयति। (कविरूपेण, वाणीरूपेण, ब्रह्मरूपेण) - कविरूपेण

46.हर्षचरितस्य प्रथमे पद्ये नमः करोति। (ब्रह्मणे, शम्भवे, उमायै) - शम्भवे

47.हर्षमते कविवेधः अस्ति। (व्यासः, ब्रह्मा, विष्णुः) - व्यासः

48.सतां कुलविद्या वर्तते। (राजनीतिः, प्रियंवदता, वेदविद्या) - प्रियंवदता

49.कादम्बरी अस्ति। (नाटकम्, गद्यकाव्यम्, महाकाव्यम्) - गद्यकाव्यम्

50.बाणभट्टस्य पितुर्नाम अस्ति। (अर्थपतिः, कुबेरः, चित्रभानुः) - चित्रभानुः

51. दुर्जनस्य गलात् अधः न गच्छति। (सुभाषितम्, जलम्, विषम्) - सुभाषितम्

52.तारापीडस्य मन्त्री आसीत्। (इन्द्रायुधः, शूद्रकः, शुकनासः) - शुकनासः

53.हंसस्य पुत्री............... अस्ति। (कादम्बरी, महाश्वेता, विलासवती) - महाश्वेता

54.रूपकस्य भेदाः सन्ति। (नव, दश द्वादश) - दश

55.नाटकस्य कथावस्तु भवति। (इतिहासप्रसिद्धम्, कविकल्पितम्, वेदोक्तम्) - इतिहासप्रसिद्धम्

56.शाकुन्तलनाटकस्य हृदयम् कथ्यते। (प्रथमाङ्कः, चतुर्थाङ्कः, सप्तमाङ्कः) - चतुर्थाङ्कः

57. दुष्यन्तः मृगयां कुर्वन् प्राप्नोति। (वसिष्ठाश्रमम्, कण्वाश्रमम्, चम्पारण्यम्) - कण्वाश्रमम्

58.काव्येषु............... रम्यं भवति। (गद्यम्, पद्यम्, नाटकम्) - नाटकम्

59.अञ्जलिशब्दः लिङ्गे प्रयुज्यते। (पुं., स्त्री, नपुं.) - स्त्रीलिङ्गे

60. भट्टनारायणस्य उपाधिः अस्ति। (कुलगुरुः, मृगराजलक्ष्मा, दीपशिखा) - मृगराजलक्ष्मा

61. वेणीसंहारे मुख्यः रसः अस्ति। (हास्यः, शान्तः, वीरः) - वीरः

62.जयद्रथस्य पत्न्याः नाम वर्तते। (दुःशला, द्रौपदी, भानुमती) - दुःशला

63.द्रोणाचार्यस्य वधस्य सूचना अङ्के प्रदीयते। (द्वितीये, तृतीये, पञ्चमे) - तृतीये

64.कृष्णः हस्तिनापुरं गतवान्। (सन्ध्यर्थम्, युद्धार्थम्, शिक्षार्थम्) - सन्ध्यर्थम्

65.भवभूतेः पितुर्नाम आसीत्। (नीलकण्ठः, श्रीकण्ठः, नारायणः) - नीलकण्ठः

66.उत्तररामचरितम् प्रकारकं रूपकम् अस्ति। (प्रकरणम्, नाटकम्, नाटिका) - नाटकम्

67.तृतीयाङ्कस्य नाम अस्ति। (चित्रदर्शनम्, सम्मेलनम्, छाया) - छाया

68.गुरूणां सन्देशं नीत्वा अयोध्याम् आगच्छति। (अष्टावक्रः दुर्मुखः, शम्बूकः) -

अष्टावक्रः

69.लक्ष्मणपुत्रस्य नाम अस्ति। (चन्द्रकेतुः चित्रकेतुः, मकरकेतुः) - चन्द्रकेतुः

70.उत्तररामचरिते...........अङ्काः सन्ति। (सप्त, पञ्च, नव) - सप्त

71. मृच्छकटिकं प्रकारकं रुपकम् अस्ति। (प्रकरण, नाटक, भाग) - प्रकरणम्

72.समाधिः वः पातु। (विष्णोः, शम्भोः, ब्रह्मणः) - शम्भोः

73.मृच्छकटिके नायिका अस्ति। (वासवदत्ता, विलासवती, वसन्तसेना) - वसन्तसेना

74.द्यूते सर्वं पराजयते। (संवाहकः, सम्मोहनः, शर्विलकः) - संवाहकः

75.चारुदत्तस्य पुत्रः........अस्ति। (रोहसेनः, रोहितः, रमणः) - रोहसेनः

76.निबन्धाः खलु .......... उत्तरेण न शक्याः निबद्धम्। (ज्ञानम्, परिशीलनम्, लेखनम्) -

परिशीलनम्

77.निबन्धाः प्रायःभवन्ति। (पञ्चविधा, षोढा, चतुर्विधा) - चतुर्विधा

78.कविता कालिदासस्य इत्यनेन शीर्षकेन लिखितः निबन्धः प्रकारको भवति।

(आख्यानात्मकः, विवेचनात्मकः, वर्णनात्मकः) - आख्यानात्मकः

79.सर्वप्रथमं निबन्धस्य विचरणीयं भवति। (विषयवस्तु, शरीरम्, भाषा) - विषयवस्तु

80.निबन्धे अवतरणिका इष्यते। (विस्तृता, लध्वी, अतिविस्तृता) - लध्वी

प्रश्न - 1 उचितं विकल्पं चित्वा उत्तरं लिखत।

(1) बाणभट्टस्य स्थितिकालः वर्तते।

(क) 675-750 (ख) 500-550 (ग) 647 (घ) 900-950

उत्तर - ग - 647

(2) कवीनां निकषम् अस्ति?

(क) काव्यम् (ख) पद्यम् (ग) चम्पूः (घ) गद्यम्

उत्तर - (घ) गद्यम्

(3) दशकुमारचरितम् अस्ति।

(क) महाकाव्यम् (ख) गद्यकाव्यम् (ग) चम्पूः (घ) खंडकाव्यम्

उत्तर - (ख) गद्यकाव्यम्

(4) चम्पूरामायणस्य शैली वर्तते ?

(क) गौड़ी (ख) पद्यात्मिका (ग) गद्यात्मिका (घ) वैदर्भी

उत्तर - (घ) वैदर्भी

(5) कादम्बर्याः मंगलाचरणे छन्दसः प्रयोगोऽस्ति।

(क) स्त्रग्धरायाः (ख) मालिन्याः (ग) मन्दाक्रान्तायाः (घ) वंशस्थस्य

उत्तर - (घ) वंशस्थस्य

(6) दमयन्ती कस्य राज्यस्य पुत्री आसीत?

(क) निषधस्य (ख) विदर्भस्य (ग) मगधस्य (घ) नलस्य

उत्तर - (ग) मगधस्य

(7) शिवराजविजयः कृतिर्वर्तते।

(क) दण्डिनः (ख) हर्षस्य (ग) अम्बिकादत्तव्यासस्य (घ) बल्लालसेनस्य

उत्तर - (ग) अम्बिकादत्तव्यासस्य

प्रश्न - यथायोग्यं योजयत।

नैषधीयचरितम् - दण्डी

हर्षचरितम् - ब्राह्मणैः

मरीचिमाली - भारविः

काव्यादर्शः - वैनायकम्

महीसुरैः - सूर्यः

अर्थगौरवम् - बाणभट्टः

हैरम्बम् - श्रीहर्षः

उत्तर - नैषधीयचरितम् - श्रीहर्षः

हर्षचरितम् - बाणभट्टः

मरीचिमाली - सूर्यः

काव्यादर्शः - दण्डी

महीसुरैः - ब्राह्मणैः

अर्थगौरवम् -भारविः

हैरम्बम् - वैनायकम्

प्रश्न - एकवाक्येन उत्तरत।

1. बाणभट्टस्य पितुर्नाम किम् अस्ति ?

   उत्तर - चित्रभानुः

2. हर्षमते कविवेधः कः अस्ति ?

   उत्तर - व्यासः

3. विदिशानामनगर्यां कः राजा शासनं करोति स्म ?

   उत्तर - शूद्रकः नाम राजा

4. ताम्बूलकरण्डवाहिन्याः नाम किम् ?

   उत्तर - पत्रलेखा

5. राजवाहनस्य पिता कः आसीत् ?

   उत्तर - राजहंसः

6. डम्बरशब्दस्य कः अर्थः ?

   उत्तर - सौभाग्यातिसंरम्भः

प्रश्न - शुद्धवाक्यानां समक्षे 'आम्' अशुद्धवाक्यानां समक्षे 'न' इति लिखत।

1. मेघदूतम् सन्देशकाव्यम् अस्ति। आम्
2. रघुवंशे एकोनविंशतिः सर्गाः सन्ति। आम
3. बलवद्विरोधिता दुरन्ता वर्णिता। आम्
4. दण्डिनः अर्थगौरवम् अस्ति। न
5. काञ्जीवरं उत्तरदिग्विभागे स्थितमस्ति। न
6. चम्पूरामायणम् अलंकारशास्त्रीयः ग्रन्थः अस्ति । न

प्रश्न - प्रदत्तेभ्यः विकल्पेभ्यः समुचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत ।

(शुकनासः, उपन्यासः, मन्दाक्रान्तायाः, षष्ठीतत्पुरुषः, मनोहारी, आख्यायिका)

1. हर्षचरितस्यकाव्यप्रकारः……….. वर्तते। आख्यायिका
2. मेघदूते सर्वत्र………छन्दसः प्रयोगोऽस्ति। मन्दाक्रान्तायाः
3. तारापीडस्य मन्त्री……आसीत्। शुकनासः
4. जगन्निवासः - इत्यत्र………समासः। षष्ठीतत्पुरुषः
5. शिवराजविजयस्य काव्यप्रकारः……..वर्तते। उपन्यासः
6. हितं…………च दुर्लभं वचः। मनोहारी

प्रश्नः 6 - "सर्गस्थितिनाशहेतवे" इत्यत्र कः समासः, तं विवृणुत?

उत्तर - सर्गस्थितिनाशहेतवे - सर्गश्च स्थितिश्च नाशश्च सर्गस्थितिनाशाः, तेषां हेतुः (ष. तत्पु.) तस्मै सर्गस्थितिनाशहेतवे।

प्रश्नः 7 - "षण्णामृतूनाम्" शब्दस्य कोऽर्थः?

उत्तर - षण्णामृतूनाम् = वसन्तग्रीष्मवर्षाशरद्धेमन्तशिशिराणाम्।

प्रश्नः 8 - माघे ये गुणाः सन्ति ते के?

उत्तर - माघकाव्ये कालिदासस्योपमा, भारवेरर्थगौरवं, दण्डिनः पदलालित्यम् इत्येतेषां त्रयाणामपि गुणानामभूतपूर्वः सन्निवेशः समजनि इत्यपि आचक्षते।

प्रश्नः 9 - कः वत्सरं द्वादशसु भागेषु विभनक्ति?

उत्तर - सूर्यः

प्रश्नः 10 - कादम्बर्याः उत्तरार्द्धं कः विरचितवान्?

उत्तर - पुलिन्दभट्टः

प्रश्नः 11 - 'रोलम्बकदंबस्य' पदस्य कोऽर्थः?

उत्तर - भ्रमराणां समूहस्य

प्रश्नः 12 - बाणभट्टस्य कालः कदा मन्यते?

उत्तर - 647 ई.

प्रश्नः 13 - मूलस्तम्भः कदा भवति?

उत्तर - त्रैलोक्यमेव नानाभङ्गिशोभित्वान्नगरं तदारम्भे मूलस्तम्भः।

प्रश्नः 14 - कादम्बर्याः मङ्गलपद्ये किं वृत्तम्?

उत्तर - वंशस्थ

प्रश्नः 15 - हूणविजयार्थं कः प्रस्थितः?

उत्तर - राजवर्द्धनः

प्रश्नः 16 - विष्णोः माया किं करोति?

उत्तर - सम्मोहितम्

प्रश्न: 18 - वर्षमिव-भारतम् इत्यस्य तात्पर्यं लिखत?

उत्तर - सर्वविदे - सर्वाः विद्याः वेत्ति यस्तस्मै, कविरेव वेधाः, तेषां कवीनां वेधाः अर्थात् कविबुद्धीनां श्रेष्ठः यः तस्मै व्यासाय तन्नामकाय मुनये नमः । यः व्यासः खलु पुण्यं पावनं भारतं तन्नामकं देशं सरस्वत्याः वाण्याः वर्षं वृष्टिमिव चक्रे - कृतवान् ॥

प्रश्न: 19 - कस्य कुमारस्य कथा कस्मिन् उच्छ्वासे ग्रथिता?

उत्तर - यतो हि कुमाराः दश आसन् अतः दशकुमारचरितेऽस्मिन् कथाः अपि दश एव सन्ति। दशभिः कुमारैः कथितायाः कथायाः क्रमः एतादृशो वर्तते - प्रथमा सोमदत्तस्य कथा। द्वितीया पुष्पोद्भवस्य कथा। तृतीया राजवाहनस्य पराक्रमस्य कथा। चतुर्थी प्रहारवर्मणः पुत्रस्य अपहारवर्मणः कथा। पञ्चमी अपहारवर्मणः भ्रातुः उपहारवर्मणः कथा। षष्ठी अर्थपालस्य कथा। सप्तमी प्रमतेः कथा। अष्टमी मित्रस्य कथा। अस्यां कथायां धूमिनी-गोमिनी-निम्बवती-नितम्बवतीनां कथाः अपि समागच्छन्ति। नवमी मन्त्रगुप्तस्य कथा। अन्ते दशमी कथा विश्रुतस्य वर्तते॥

प्रश्न: 20 - श्रीहर्षमतेन वाग्मिता का भवति?

उत्तर - यः खलु मितम् अर्थात् परिमितं सीमितं वा वदति, अथ यदपि वदति तत् सारवत् अर्थात् सारपूर्ण वचः वदति, स एव वाग्मी भवति । एतादृशी वाग्मिता प्रशंसनीया भवति तद्वाग्युक्तिमेव मन्यन्ते।

प्रश्न: 21 - मेघदूतस्य मङ्गलपद्यं लिखत?

उत्तर -

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः,

शापेनास्तङ्गमितमहिमा वर्षभोग्येण भर्तुः।

यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु, स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु॥

प्रश्न 22 - संक्षेपतः परिचयं कारयत। (कोऽपि 2)

- चम्पूकाव्यस्वरुपम्

उत्तर - 'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इति सामान्यतः चम्पूकाव्यलक्षणं प्रथितमस्ति लक्षणग्रन्थेषु। अथ चास्य चम्पूशब्दस्य व्युत्पतिरपि ध्यातव्या। सा चेत्थं प्रदीयते - चम्पयति योजयति गद्यपद्ये इति चम्पूः। अथवा चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयतीति चम्पूः।

- सूर्यवर्णनम्

उत्तर - एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः, कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्।

- आशीर्नमस्क्रियावस्तुनिर्देशः

उत्तर - श्रीहर्षकविः - नैषधाख्यं महाकाव्यं चिकीर्षुः चिकीर्षितार्थाविघ्नपरिसमाप्तिहेतोः आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम् - इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वात् कथानायकस्य राज्ञो नलस्य इतिवृत्तरुपं मङ्गलं वस्तु निर्दिशति निपीयेति। यस्य क्षितिरक्षिणः क्ष्मापालस्य नलस्य कथाम् उपाख्यानम्।

प्रश्न 23 - दशकुमारचरितस्य कथावस्तुः लेख्यः?

उत्तर - पाठ की प्रस्तावना से लिखें।

प्रश्न 24 - सूक्तिविवेचनं कुरुत। (कोऽपि 2)

1. क्षणे क्षणे यन्नवतामुपैति तदेव रुपं रमणीयतायाः।

उत्तर - का नाम रमणीयता इति प्रश्ने इयमुक्तिः उत्तरम्। यद्वस्तु प्रतिक्षणं नावीन्यं भजते तदेव वस्तु रमणीयम् भवति। प्रतिदिनं सूर्योदयः भवति। परं यः खलु सूर्योदयस्य दर्शनं करोति सः प्रतिदिनं सूर्योदयस्य नवीनां नवीनाम् अनुभूतिं करोति अर्थात् स एव सूर्यः प्रातःकाले पुनः पुनः उदयं गच्छन् तद्दर्शकानां कृते नवीनमिव प्रतीयते। एतदेवास्य सूर्यस्य रमणीयत्वमस्ति। एवमेव प्रतिदिनं क्रियमाणा प्रभोः भक्तिरपि भक्ताय नवीनं रूपं धृत्वा समक्षमायाति। अतः भक्तिरपि रमणीया वर्तते। अस्यायं भावः (यत्-यद्यद् वस्तु क्षणे क्षणे नवं नवं रूपं धर्तुं समर्थं भवति, तत् तद् वस्तु रमणीयं भवितुमर्हति। अनेनैव प्रकारेण यदि मानवः अपि रमणीयो भवितुमर्हति तदा तेनापि क्षणे क्षणे नवीनं रूपं धर्तव्यं भवतीति भावः।

2. क्षमा हि मूलं सर्वतपसाम्।

उत्तर - बहुविधानि तपांसि भवन्ति। तेषां सर्वविधानां तपसां मूलं यदि किमपि वर्तते तत् क्षमा अस्ति। सर्वेषां तपसां क्षमामूलरूपमस्ति। नास्ति मूलम् कुतः शाखा इति न्यायेन तपसां मूलं क्षमा एव नास्ति चेत् अन्यानि शाखारूपाणि तपांसि कुतः भवितुमर्हतीति भावः। वस्तुतस्त्वत्र क्रोधवते दुर्वाससे ब्रह्मा क्षमायाः महत्त्वम् उपदिशति। क्षमापूर्वकं ते जीवनं भवेदिति सात्विकीमपेक्षां सेवते इतिदिक् ॥

3. कामर्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।

उत्तर - कामार्ताः कामेन आर्ताः पीडिताः अर्थात् कामयुक्ताः कामिजनाः चेतनेषु नाम सजीवेषु प्राणिषु अचेतनेषु नाम निर्जीवेषु च पदार्थेषु भेदं न कर्तुं शक्नुवन्ति। तेन एतादृशाः जनाः चेतनाचेतनयोः मध्ये प्रथमं तु भेदमेव न कुर्वन्ति, भेदाभावे च ते चेतने अचेतनवद् अचेतने च चेतनवद् व्यवहारं कुर्वन्ति। एवमाचरतस्तान् महाकविना कालिदासेन प्रकृतिकृपणाः कथिताः सन्ति।

प्रश्नः 25- कस्येकस्य महाकवेः जीवन परिचयं लिखत।

(1) महाकविः बाणभट्टः

(2) महाकविः दण्डी

उत्तर - पाठ्यपुस्तक से लिखें।

**प्रश्नबैंक भाग 2**

(1) माघस्य स्थितिकालः वर्तते।

(क) 675-750 (ख) 500-550 (ग) 700 (घ) 900-950

उत्तर - (क) 675-750

(2) अलकानगर्याः वर्णनम् अस्ति?

(क) समस्ते मेघदूते (ख) पूर्वमेघे (ग) उत्तरमेघे (घ) रघुवंशे

उत्तर - (ग) उत्तरमेघे

(3) किरातर्जुनीयम् अस्ति।

(क) महाकाव्यम् (ख) गद्यकाव्यम् (ग) चम्पूः (घ) खंडकाव्यम्

उत्तर - (क) महाकाव्यम्

(4) बलवद्विरोधिता कीदृशी वर्णिता?

(क) सान्ता (ख) निकटान्ता (ग) महानता (घ) दुरन्ता

उत्तर - (घ) दुरन्ता

(5) उत्तररामचरितस्य मंगलपद्ये छन्दसः प्रयोगोऽस्ति।

(क) स्त्रग्धरायाः (ख) मालिन्याः (ग) अनुष्टुप्छन्दसः (घ) वसन्ततिलकायाः

उत्तर - (ग) अनुष्टुप्छन्दसः

(6) दमयन्ती कस्य राज्यस्य पुत्री आसीत?

(क) निषधस्य (ख) विदर्भस्य (ग) मगधस्य (घ) नलस्य

उत्तर - (ग) मगधस्य

(7) नैषधचरितं कृतिर्वर्तते।

(क) दण्डिनः (ख) हर्षस्य (ग) अम्बिकादत्तव्यासस्य (घ) बल्लालसेनस्य

उत्तर - (ख) हर्षस्य

प्रश्न - 2 यथायोग्यं योजयत।

शिशुपालवधम् - यक्षः

सञ्जीवनी - शिवः

भास्करः - नाटकम्

कान्ताविरहगुरुणा - कालिदासः

किरातवेशधारी - सूर्यः

काव्येषु रम्यम् - मल्लिनाथः

महाकविः - माघः

उत्तर - शिशुपालवधम् - माघः

सञ्जीवनी - मल्लिनाथः

भास्करः - सूर्यः

कान्ताविरहगुरुणा - यक्षः

किरातवेशधारी - शिवः

काव्येषु रम्यम् - नाटकम्

महाकविः - कालिदासः

प्रश्न - 3 एकवाक्येन उत्तरत।

1. वने-वनेचरः इत्यत्र कः अलंकारः? वृत्यानुप्रास-अलंकारः।
2. कालिदासस्य कालः कदा मन्यते ? प्रथम द्वितीय वा शताब्दौ
3. अलकानगर्यां कः राजा शासनं करोति स्म ? कुबेरः
4. विद्वद्दौषधं नाम किम् ? नैषधचरितम्
5. पार्वतीशब्दस्य का व्युत्पत्तिः? पर्वतस्य अपत्यं स्त्री पार्वती
6. लोकः कीदृशः वर्तते? भिन्न रुचिर्हि लोकः।

प्रश्न - 4 शुद्धवाक्यानां समक्षे 'आम्' अशुद्धवाक्यानां समक्षे 'न' इति लिखत।

1. अलकानामनगर्यां शूद्रको नाम राजा शासनं करोति स्म। न
2. शाकुन्तले सप्त अङ्काः वर्तन्ते। आम्
3. किरातर्जुनीये अष्टादशसर्गाः सन्ति। आम्
4. दण्डिनः अर्थगौरवम् अस्ति। न
5. लोकः भिन्नरुचिः वर्तते। आम्
6. अभिज्ञानशाकुन्तलम् गीतिकाव्यम् अस्ति। न

**प्रश्न - 5 प्रदत्तेभ्यः विकल्पेभ्यः समुचितं विकल्पं चित्वा रिक्तस्थानानि पूरयत।**

**(त्रयो, वर्षम्, श्रेयः, हरिं, आर्तिः, समासान्तम्)**

1. **वागर्थाविव इति पदं...समासान्तम्...वर्तते।**
2. **शिशुपाल वधस्यस्य प्रथमे पद्ये...हरिं...नमः करोति।**
3. **माघे गुणाः...त्रयो...सन्ति।**
4. **यक्षस्य शापस्य ...वर्षम्.....मर्यादा आसीत।**
5. **पूज्यपूजाव्यतिक्रमः ...श्रेयः.. बध्नाति।**
6. **...आर्तिः....कालं न प्रतीक्षते।**

**प्रश्न: 6 - "वसुदेवसनि" इत्यत्र कः समासः, तं विवृणुत? षष्ठी तत्पुरुष**

**प्रश्न: 7 - क्षितिरक्षिणःशब्दस्य कोऽर्थः? भूमिपालः**

**प्रश्न: 8 - मेघदूतस्य काव्यप्रकारः कः? गीतिकाव्यम् / सन्देशकाव्यम्**

**प्रश्न: 9 - सुलभं किमस्ति दुर्लभं च किम्? - सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्**

**प्रश्न: 10 - महसाम् पदस्य कोऽर्थः? तेजसाम्**

**प्रश्नः 11 - भवान्तरेषु किं किम् अभ्येति? भवान्तरेषु अपि नरस्य मूलभूत स्वभावः न परिवर्तितो भवति।**

**प्रश्नः 12 - नारदागमनं कस्मिन् सर्गे वर्णितमस्ति? प्रथमसर्गे**

**प्रश्न: 13 - अतिपरिचयात् किं भवति? - अवज्ञा**

**प्रश्न: 14 - नैषधचरितस्य मङ्गलपद्ये किं वृत्तम्? वंशस्थ-वृत्तम्**

**प्रश्न: 15 - वर्षभोग्येण इत्यत्र समासः केन सूत्रेण भवति? द्वितीया तत्पुरुष**

**प्रश्न: 16 - कालिदासस्य रचनाः लिखत ? महाकवेः सप्त कृतयः सन्ति। ताश्च - ऋतुसंहारम्, मेघदूतम्, रघुवंशम्, कुमारसम्भवम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलम्।**

**प्रश्न: 17 - ईश्वरेच्छया किं किं भवति ?**

**उत्तर - ईश्वरस्य कृपया विषमपि अमृतं भवति, अमृतमपि विषं भवति। ईश्वरेच्छया कदाचित् कण्टकः कस्यचित् जीवनस्य धारको भवति, कस्यचित् जीवनस्य च हारको भवति। पिपीलिकादंशेन कस्यचित् मरणं भवति, विषसर्पदंशेनापि कस्यचित् मरणं न भवति। एषा विचित्रा स्थितिः जनैः सर्वदा ध्यातव्या।**

**प्रश्न: 18 - "प्रख्याताः कवयो दश" इत्यस्य आशयं लिखत?**

उत्तर - आदौ कविः कालिदासोऽश्वघोषस्तु ततः परम्।
ततः कुमारदासोऽथ भारविर्भट्टिरेव च॥
माघो रत्नाकरः सिद्धो हरिश्चन्द्रस्तथैव च। कविराजश्च श्रीहर्षः प्रख्याताः कवयो दश।।
प्रश्नः 19 - मेघदूतस्य प्रथमे पद्ये यक्षः कीदृशः वर्णितः?
उत्तर - स्वाधिकारात् प्रमत्तः भर्तुः कान्ताविरहगुरुणा वर्षभोग्येण शापेन अस्तङ्गमितमहिमा, कश्चित् यक्षः जनकतनया-स्नान-पुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

प्रश्नः 20- वर्णिलिंगी शब्दे किं किं निहितमस्ति?
उत्तर - वर्णिलिङ्गी-वर्णः यस्य अस्ति सः वर्णी (तद्धितान्तप्रयोगः) । वर्णिनः लिङ्गम् अस्ति अस्येति बहुः ।
प्रश्नः 21- रघुवंशस्य मङ्गलाचरणे निरूपितस्य भगवतः स्वरुपं लिखत?
उत्तर - अस्मिन् मङ्गलाचरणे महाकविः कालिदासः शिवापार्वत्यौ नत्वा रघुवंशस्य शुभारम्भं करोति। अत्रोपमालङ्कारस्य माध्यमेन सः कथयति यदहं विशिष्टशब्दार्थयोः सम्यग्ज्ञानार्थं शब्दार्थाविव नित्ययुक्तौ संसारस्य मातापितरौ शिवपार्वत्यौ भक्त्या नमस्करोमि इति । अनेन नमनकर्मणा पार्वतीपरमेश्वरौ प्रसन्नौ भूत्वा मह्यं (कालिदासाय) काव्यरचनार्थं शक्तिं दद्यास्ताम् इति सः प्रार्थयते॥
प्रश्न 22 - मेघदूतस्य कथावस्तुः लेख्यः?
उत्तर पाठ्यपुस्तक से लिखें
प्रश्न 23 - सूक्तिविवेचनं कुरुत। (कोऽपि 2)

1. तेजसा हि न वयः समीक्ष्यते।

उत्तर - समाजे केचन जनाः तेजस्विनः भवन्ति। एतेषां तेजस्विजनानां यत् किमपि वयः भवति, तेषां वयसः आधारेण तेजसः मूल्यं न करणीयं भवति। अतः कविः कथयति यत् तेजसां वयः न समीक्ष्यते। अल्पवयस्काः अपि तेजस्विनः सन्ति चेत् तेषां तेजसः सदा आदरः करणीयः॥
अयमाशयः वयसा न कश्चित् ज्येष्ठो भवति न कश्चित् कनिष्ठो भवति। परन्तु ये खलु तेजस्विनः भवन्ति ते सदा पूज्याः भवन्ति। अतः यदि कश्चित् अल्पवयस्यः जनः तेजस्वी अस्ति, चेत् तस्य वयः दृष्ट्वा तेन सह वयोऽनुरूपः व्यवहारः न करणीयः अपितु तेजोऽनुरूपः व्यवहारः करणीयः इति॥

2. हितं मनोहारी च दुर्लभं वचः।

उत्तर - यत् हितकारि मनोहारि च स्यात् तादृशमुभयगुणयुक्तं वचनं दुर्लभं भवतीति उक्तेराशयः । वस्तुतः यद्वचनं हितं करोति, तत् सर्वदा मनः न हरति । यत् खलु मनः हरति, तद्वचनं खलु सर्वदा श्रोतुः हितं न करोति । यत् खलु हितं करोति, तत् सत्यं वचनं कटु भवतीति अनुभववशात् वयं जानीम एव ॥

प्रश्नः 24- कस्येकस्य महाकवेः जीवन परिचयं लिखत।

- भारवि
- श्रीहर्षः

उत्तर - पाठ्यपुस्तक से लिखें।

## उत्तर मध्यमा द्वितीय खंड

## संस्कृतसाहित्यम् प्रश्नबैंक सेट - 3

प्रश्न. 1 - उचितयुग्ममेलनं कुरुत -

मृच्छकटिकम् - दण्डिनः

श्रीकण्ठपदलांछनम् - लक्ष्मणस्य पुत्रः

कालिदासः - गद्यकाव्यम्

चन्द्रकेतुः - भवभूतिः

कादम्बरी - उपमालंकारः

पदलालित्यम् - शूद्रकः

उत्तर -

मृच्छकटिकम् - शूद्रकः

श्रीकण्ठपदलांछनम् - भवभूतिः

कालिदासः - उपमालंकारः

चन्द्रकेतुः - लक्ष्मणस्य पुत्रः

कादम्बरी - गद्यकाव्यम्

पदलालित्यम् - दण्डिनः

## अति लघूत्तरीय प्रश्नोत्तर

प्रश्न. - बाणस्य वंशः कः?

उत्तर - वात्स्यायनमहर्षेः वंशे

प्रश्न. शकुन्तलायै शापं कः दत्तवान्?

उत्तर - दुर्वासा ऋषिः।

प्रश्न. - भवभूतेः प्रियं छन्दः किमस्ति?

उत्तर - शिखरिणी।

प्रश्न. चारुदत्तस्य पुत्रस्य नाम किम्?

उत्तर - रोहसेनः।

प्रश्न. - मृच्छकटिके कति अङ्काः सन्ति?

उत्तर - दश अङ्काः।

प्रश्न. उज्जयिन्यां रमणीयानि स्थानानि कानि?

उत्तर - उज्जयिन्यां रमणीयानि उदकस्थानानि वर्तन्ते।

प्रश्न. 'रुमण्वता पूर्वं वञ्चितोस्मि' इति उदयनः कथयति।

उत्तर - 'रुमण्वता पूर्वं वञ्चितोस्मि' इति उदयनः कथयति।

प्रश्न - कस्य विज्ञातारः दुर्लभाः?

उत्तर - लोके विशालानां गुणानां सत्काराणां च विज्ञातारो दुर्लभाः।

प्रश्न - कुत्र शय्या स्तीर्णा?

उत्तर - समुद्रगृहके किल शय्या स्तीर्णा।

प्रश्न - श्रुतिसुखनिनदे कस्याः सम्बोधनम्।

उत्तर - श्रुतिसुखनिनदे घोषवतीवीणायाः सम्बोधनम्।

प्रश्न - सूर्यमुखप्रासादात् कः अवतरति?

उत्तर - सूर्यमुखप्रासादात् वत्सराजउदयनः अवतरति।

प्रश्न - प्रोषितभर्तृका का अस्ति?

उत्तर - प्रोषितभर्तृका वासवदत्ता अस्ति।

प्रश्न - विदूषकः मैत्रेयः कः अस्ति।

उत्तर - विदूषकः मैत्रेयः चारुदत्तस्य सखा अस्ति।

प्रश्न - मृच्छकटिके कति अङ्काः वर्तन्ते?

उत्तर - मृच्छकटिके दश अङ्काः वर्तन्ते।

प्रश्न - गर्भनाटकस्य परिकल्पना कुत्र वर्तते?

उत्तर - गर्भनाटकस्य परिकल्पना उत्तररामचरितस्य सप्तमे अङ्के वर्तते।

प्रश्न - भट्टनारायणः किं खण्डयति?

उत्तर - भट्टनारायणः भाग्यवादं खण्डयति।

प्रश्न - ब्रह्माण्डभाण्डस्य दीपकः कः?

उत्तर - ब्रह्माण्डभाण्डस्य दीपकः सूर्यः।

## लघूत्तरीय प्रश्नोत्तर

प्रश्न. अनामिका कथं सार्थवती बभूव?

उत्तर - 'पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाधिष्ठितकालिदासः।

अद्यापि तत्तुल्यकवेरभावात् अनामिका सार्थवती बभूव ॥'

अर्थात् यदा कस्यचित् वस्तुनः गणना क्रियते तदा अङ्गुलीनां प्रमाणत्वेन उपयोगः क्रियते। पुरा कवीनां गणनाप्रसङ्गे यदा अङ्गुलीनां प्रमाणत्वेनोपयोगः कृतः तदा प्रथमायां कनिष्ठिकायामङ्गुल्यां कालिदासस्य नाम स्थापितम्। तदनन्तरमन्यस्य कवेः नाम

स्थापनीयमासीत् परं तादृशस्य कस्यापि कवेरभावात् कनिष्ठिकापरायाः अङ्गुल्याः नाम अनामिका संजातेति जनश्रुतिः । इयं जनश्रुतिः कालिदासस्य महिमानं प्रस्थापयति ।

प्रश्न. - लोके भिन्न रुचिः इत्यस्य आशयं लिखत। अथवा लोकः कीदृशः वर्तते?
लोके अर्थात् संसारे विभिन्नानां जनानां रुचिः कदापि समाना न भवति। अतः अस्य लोकस्य वैशिष्ट्यं वर्णयन् कविः कथयति यत् भिन्नरुचिर्हि लोकः इति। यदि लोके जनानां रुचिः अभिन्ना स्यात् तर्हि लोके दुर्व्यवस्था भवितुं शक्यते। तद्यथा यदि सर्वेषां जनानां दुग्धे रुचिः स्यात् तदा दध्नः किं भवेत्। अतः इदमावश्यकं प्रतीयते यत् केषाञ्चित् दुग्धे रुचिः स्यात् केषाञ्चित् च दध्नि।

प्रश्न. - हितं मनोहारि च दुर्लभं वचः इत्यस्य आशयं लिखत।
हितं मनोहारि च दुर्लभं वचः ॥
यत् हितकारि मनोहारि च स्यात् तादृशमुभयगुणयुक्तं वचनं दुर्लभ भवतीति उक्तेराशयः। वस्तुतः यद्वचनं हितं करोति, तत् सर्वदा मनः न हरति। यत् खलु मनः हरति, तद्वचनं खलु सर्वदा श्रोतुः हितं न करोति। यत् खलु हितं करोति, तत् सत्यं वचनं कटु भवतीति अनुभववशात् वयं जानीम एव॥

प्रश्न. - 'सर्वः स्वार्थं समीहते' तात्पर्यं लिखत।
सर्वः स्वार्थं समीहते । सर्वः - निखिलः जनः मनुष्यः स्वार्थस्य अर्थात् स्वकीयस्य लाभस्य प्रयोजनस्य वा विचारं करोति। परार्थं परस्य लाभस्य प्रयोजनस्य वा विचारं न करोति। बसयाने प्रवेशार्थं सर्वः जनः प्रतीक्षारतो भवति। तत्र येन केन प्रकारेण मम प्रवेशः भवेत् सुखदं स्थानम् अहम् प्राप्नुयाम् इत्येव स इच्छति । एवमेव सर्वत्र सर्वः जनः स्वकीयं स्वार्थमेव काङ्क्षतीति भावः ॥

प्रश्न - चम्पूकाव्यलक्षणं स्पष्टयत।
'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इति सामान्यतः चम्पूकाव्यलक्षणं प्रथितमस्ति लक्षणग्रन्थेषु । चम्पयति योजयति गद्यपद्ये इति चम्पूः । अथवा चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयतीति चम्पूः ।

प्रश्न. वर्षमिव भारतम् इत्यस्य अभिप्रायं किम्?

- सर्वविदे - सर्वाः विद्याः वेत्ति यस्तस्मै, कविरेव वेधाः, तेषां कवीनां वेधाः अर्थात् कविबुद्वीनां श्रेष्ठः यः तस्मै व्यासाय तन्नामकाय मुनये नमः। यः व्यासः खलु पुण्यं पावनं भारतं तन्नामकं देशं सरस्वत्याः वाण्याः वर्षं वृष्टिमिव चक्रे - कृतवान् ॥

प्रश्न - अर्थगौरवं कस्य किमर्थं च प्रसिद्वम्?

उत्तर - भारवेरर्थगौरवं प्रसिद्वम् । अत एव मल्लिनाथोऽपि टीकायाः प्रारम्भे - नारिकेलफलसम्मितं वचो भारवेरित्याह । बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः । 'हितं मनोहारि च दुर्लभं वचः', 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतमभिप्रायं समर्थयन्ति । 'भारवेः अर्थगर्गौरवम्' इत्युक्तिरपि विमर्शकलोके प्रसिद्वा।

प्रश्न. - कादम्बरी इति गद्यकाव्यस्य मङ्गलपद्यं लिखत।

उत्तर -

“रजोजुषे जन्मनि सत्त्ववृत्तये,
स्थितौ प्रजानां प्रलये तमःस्पृशे।
अजाय सर्गस्थितिनाशहेतवे,
त्रयीमयाय त्रिगुणात्मने नमः।।”

प्रश्न. - रामः केन व्याजेन सीतां वनं प्रेषयति?

रामस्य मातरः गुरुः वसिष्ठश्च सपत्नीकः ऋष्यशृङ्गस्य आश्रमं गताः सन्ति अतः अयोध्यायां कोऽपि गुरुजनः न वर्तते। अष्टावक्रः गुरूणां सन्देशं नीत्वा रामस्य समीपम् आगच्छति। तदनु चित्रवीथीदर्शनेन सीतायाः मनसि पुनः गङ्गां गत्वा स्नानस्य इच्छा भवति। प्रथमाङ्के एव सीताविषयः अपवादः नगरे प्रसरति। दुर्मुखस्य मुखात् अयम् अपवादः रामेण अपि श्रूयते। तदा रामः सीतायाः इच्छापूर्तेः व्याजेन सीतां वनं प्रेषयति।

प्रश्न. 21 - नान्दी इत्यस्य लक्षणं लिखत।

उत्तर - आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥ माङ्गल्यशङ्खचक्राब्जकोशकैरवशंसिनी।

पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥

प्रश्न. - सूर्यवर्णनं कुरुत।

एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः, कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्। इति।

प्रश्न. - हर्षमतेन् वाग्मिता का भवति?

उत्तर - यः खलु मितम् अर्थात् परिमितं सीमितं वा वदति, अथ यदपि वदति तत् सारवत् अर्थात् सारपूर्ण वचः वदति, स एव वाग्मी भवति । एतादृशी वाग्मिता प्रशंसनीया भवति।

प्रश्न - अर्थगौरवं नाम किम्?

उत्तर - भारवेरर्थगौरवं प्रसिद्वम् । अत एव मल्लिनाथोऽपि टीकायाः प्रारम्भे - नारिकेलफलसम्मितं वचो भारवेरित्याह । बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः । 'हितं मनोहारि च दुर्लभं वचः', 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतमभिप्रायं समर्थयन्ति । 'भारवेः अर्थगर्गौरवम्' इत्युक्तिरपि विमर्शकलोके प्रसिद्वा।

प्रश्न.- ईश्वरस्य कृपया किं - किं भवति?

उत्तर - ईश्वरस्य कृपया विषमपि अमृतं भवति, अमृतमपि विषं भवति । ईश्वरेच्छया कदाचित् कण्टकः कस्यचित् जीवनस्य धारको भवति, कस्यचित् जीवनस्य च हारको भवति । पिपीलिकादंशेन कस्यचित् मरणं भवति, विषसर्पदंशेनापि कस्यचित् मरणं न भवति । एषा विचित्रा स्थितिः जनैः सर्वदा ध्यातव्या ॥

प्रश्न - माघे के के गुणाः सन्ति?

उत्तर - माघकाव्ये कालिदासस्योपमा, भारवेरर्थगौरवं, दण्डिनः पदलालित्यम् इत्येतेषां त्रयाणामपि गुणानामभूतपूर्वः सन्निवेशः समजनि इत्यपि आचक्षते । तथा हि-

उपमा कालिदासस्य भारवेरर्थगौरवम्।
दण्डिनः पदलालित्यं माघे सन्ति त्रयो गुणाः ॥ इति ॥

प्रश्न.- मेघदूते यक्षः कीदृशः वर्णितः?
उत्तर - स्वाधिकारात् प्रमत्तः भर्तुः कान्ताविरहगुरुणा वर्षभोग्येण शापेन अस्तङ्गमितमहिमा, कश्चित् यक्षः जनकतनया- स्नान-पुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्याश्रमेषु वसतिं चक्रे।

प्रश्न - चम्पूकाव्यस्वरुपं किम्?
उत्तर - 'गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते' इति सामान्यतः चम्पूकाव्यलक्षणं प्रथितमस्ति लक्षणग्रन्थेषु। चम्पयति योजयति गद्यपद्ये इति चम्पूः । अथवा चमत्कृत्य पुनाति सहृदयान् विस्मयीकृत्य प्रसादयतीति चम्पूः ।

प्रश्न. - कस्य कुमारस्य कथा कस्मिन् उच्छवासे लिखितमस्ति?
उत्तर - दशकुमारचरितेऽस्मिन् कथाः अपि दश एव सन्ति। प्रथमा सोमदत्तस्य कथा। द्वितीया पुष्पोद्भवस्य कथा। तृतीया राजवाहनस्य पराक्रमस्य कथा। चतुर्थी प्रहारवर्मणः पुत्रस्य अपहारवर्मणः कथा। पञ्चमी अपहारवर्मणः भ्रातुः उपहारवर्मणः कथा। षष्ठी अर्थपालस्य कथा। सप्तमी प्रमतेः कथा। अष्टमी मित्रस्य कथा। नवमी मन्त्रगुप्तस्य कथा। अन्ते दशमी कथा विश्रुतस्य वर्तते ॥

प्रश्न - सूर्यवर्णनं शिवराजविजयानुसारं लिखत।
उत्तर - एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः, कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्। इति।

प्रश्न. - चारुदत्तस्य उपरि किमर्थं अभियोगः आसीत् ?
उत्तर - चारुदत्तं मेलितुम् आगता वसन्तसेना भ्रमवशात् शकारस्य रथे उपविशति। उद्याने रथो गच्छति तदा शकारः रथे वसन्तसेनां पश्यति। सः वसन्तसेनां कामपूर्तये प्रार्थयते। वसन्तसेना

तदाधीना न भवति अतः शकारः तस्याः कण्ठमवरुध्य तां मूर्च्छितां मृतां ज्ञात्वा उद्याने एव पर्णैः आच्छाद्य ततः पलायते। शकारः चारुदत्तं विरुध्य न्यायालये अभियोगं करोति यत् वसन्तसेनायाः हत्या चारुदत्तेन कृता। विरुद्धैः प्रमाणैः चारुदत्ते अभियोगः सिद्धः भवति। न्यायपालकः चारुदत्ताय मृत्युदण्डं प्रयच्छति।

प्रश्न - नान्दी इत्यस्य लक्षणं लिखत ?

1- नान्दी-

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात् प्रयुज्यते। देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता॥

माङ्गल्यशङ्खचक्राब्जकोशकैरवशंसिनी। पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैरुत ॥

प्रश्न. - सूत्रधारः कः भवति?

सूत्रधारः-

आसूत्रयन् गुणान् नेतुः कवेरपि च वस्तुना। रङ्गप्रसाधनप्रौढः सूत्रधार इवोदितः ॥

नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो मतो बुधैः ॥

प्रश्न - स्वप्नवासवदत्तस्य मङ्गलाचरणम् लिखत

उत्तर - स्वप्नवासवदत्तस्य मङ्गलाचरणम् :-

उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम्।

पद् मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥1॥

## दीर्घोत्तरीय प्रश्नोत्तर

प्रश्न. - 'तेजसा हि न वयः समीक्ष्यते' विवृणुत।

उत्तर - समाजे केचन जनाः तेजस्विनः भवन्ति। एतेषां तेजस्विजनानां यत् किमपि वयः भवति, तेषां वयसः आधारेण तेजसः मूल्यं न करणीयं भवति। अतः कविः कथयति यत् तेजसां वयः न समीक्ष्यते। अल्पवयस्काः अपि तेजस्विनः सन्ति चेत् तेषां तेजसः सदा आदरः करणीयः ॥

प्रश्न - 'लोको भिन्न रुचिः' इत्यस्य आशयं लिखत।

लोके अर्थात् संसारे विभिन्नानां जनानां रुचिः कदापि समाना न भवति। अतः अस्य लोकस्य वैशिष्ट्यं वर्णयन् कविः कथयति यत् भिन्नरुचिर्हि लोकः इति। यदि लोके जनानां रुचिः अभिन्ना स्यात् तर्हि लोके दुर्व्यवस्था भवितुं शक्यते। तद्यथा यदि सर्वेषां जनानां दुग्धे रुचिः स्यात् तदा दध्नः किं भवेत्। अतः इदमावश्यकं प्रतीयते यत् केषाञ्चित् दुग्धे रुचिः स्यात् केषाञ्चित् च दध्नि।

प्रश्न.- 'सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्' सूक्तिविवेचनं कुरुत।

उत्तर - लोके अर्थात् अस्मिन् संसारे या रम्यता दृश्यते, सा रम्यता सर्वेभ्यः जनेभ्यः सर्वथा सुलभा भवति। यतो हि सा यदि नास्ति, अल्पतरा वा अस्ति चेत् अनेकैः उपायैः सरलतया प्राप्तुं शक्यते। परन्तु गुणानामर्जनं सरलतया प्राप्तुं न शक्यते तदर्थं तु महान् प्रयत्नः करणीयो भवति। एतत् सुलभत्वं दुर्लभत्वं च मनसि कृत्वा कविनेदं वचः उच्चारितमस्ति।

प्रश्न - भोजराजेन कति ग्रन्थाः लिखिताः?

भोजराजेन अनेके शास्त्रग्रन्थाः नैकानि च काव्यानि विरचितानि सन्ति । तेष्वन्यतममिदं 'चम्पूरामायणम्'। अन्ये चैते सन्ति सरस्वतीकण्ठाभरणम्, शृङ्गारप्रकाशः (अलङ्कारशास्त्रीयः ग्रन्थः) शब्दानुशासनम् (भोजव्याकरणनामकः व्याकरणशास्त्रीयः ग्रन्थः), सङ्गीतप्रकाशः (सङ्गीतशास्त्रस्य ग्रन्थः), समराङ्गणसूत्रधारः (वास्तुशास्त्रीयम् पुस्तकम्), शिवदत्तस्तोत्रम्, राजमार्तण्डः (व्याख्यानम्), रघुवंशव्याख्यानम्, राजवार्तिकम् (व्याख्यानम्) चैतानि नैकानि भोजराजेन विरचितानि पुस्तकानि सन्ति।

प्रश्न. - 'अङ्गारन्यायः' विवेचयत।

अङ्गारन्यायः -

अङ्गारः उष्णः यदा भवति तदा हस्ते गृहीतः चेत् हस्तं दहति स एव यदा शीतलः भवति तदा स्पृष्टः चेत् हस्तं मलिनं करोति। एवं कस्याम् अपि दशायां तस्य स्पर्शः दोषजनकः एव। तथा एव दुर्जनस्य संगतिः अपि हानिम् एव करोति इति श्रोतयितुम् अस्य न्यायस्य प्रयोगः भवति।

प्रश्न - अतिपरिचयन्यायः विवेचयत।

अतिपरिचयन्यायः -

अतिपरिचियेन प्रेमापेक्षया अपमान एव भवति इत्यस्य न्यायस्य अर्थः। यथा- अत्यन्तं मूल्यवान् सुगन्धी चन्दनवृक्षः मलयपर्वते अधिकप्रमाणेन उपलभ्यते। अधिकप्रमाणेन लभ्यते इति कारणेन तत्रस्थाः भिल्लमहिलाः तस्य वृक्षस्य मूल्यम् अज्ञात्वा तम् इन्धनरूपेण विनियुञ्जते ।

"अतिपरिचयाद् अवज्ञा सन्ततगमनाद् अनादरो भवति।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥" (शार्ङ्गधरपद्धतिः 83)

प्रश्न. नाटकस्य लक्षणम् लिखत।

नाटकस्य लक्षणम् -

नाटकस्य कथावस्तु इतिहासप्रसिद्धं स्यात्। मुखप्रतिमुखादिभिः पञ्चसन्धिभिः युक्तं, विलास-सुख-दुःखादिप्रसङ्गयुक्तं नाटकं भवेत्। नाटके न्यूनातिन्यूनं पञ्च, अधिकाधिकं दश अङ्काः भवेयुः। नाटके प्रख्यातवंशे उत्पन्नः प्रतापी धीरोदात्तः नायकः भवेत्। नाटके मुख्यः रसः वीरः श्रृङ्गारः वा भवेत्, अन्ये रसाः गौणतया निरूपणीयाः। निर्वहणसन्धौ (अन्तभागे, समाप्त्यवसरे) अद्भुतः रसः भवेत्। नाटके कथावस्तु गोपुच्छवत् निरूपणीयम्। यथा अग्रे सूक्ष्मम्, मध्ये विस्तीर्णम्, उपसंहारे च सूक्ष्मम् इति। इत्थं नाटकस्य प्रधानलक्षणानि सन्ति। एतैः लक्षणैः युक्तं रूपकं नाटकम् उच्यते। पञ्चाङ्कं नाटकम् अवरं, सप्ताङ्कं मध्यम तथा दशाङ्कं नाटकं महानाटकम् उच्यते।

प्रश्न - शिवस्य अष्टौ मूर्तयः विवेचयत अथवा अभिज्ञानशाकुन्तलम् इति नाटकस्य मङ्गलपद्यं लिखत।

उत्तर - या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री।
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः।
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

अष्टमूर्तिः शिवः - शिवस्य अष्टमूर्तिविषये पुराणेषु अपि निरूपणं प्राप्यते। ताः अष्टौ मूर्तयः यथा जलम्, अग्निः, यजमानः, सूर्यः, चन्द्रः, आकाशम्, पृथिवी, वायुः इति। एताभिः मूर्तिभिः युक्तः ईश्वरः सर्वान् रक्षतु इति भावः।

प्रश्न. - 'स्वप्नवासवदत्तम्' इत्याख्यनाटकस्य प्रथमाङ्कस्य सारांशं लिखत।

उत्तर - 'स्वप्नवासवदत्तम्' इत्याख्यनाटकस्य प्रथमेऽङ्के -

परिव्राजकवेषधारी वत्सराज उदयनस्य मन्त्री यौगन्धरायणः आवन्तिकावेषधारिण्या वासवदत्तया सह तपोवनं प्रविशति।

अस्मिन्नेव समये मगधराजस्य कुमारी पद् मावती काञ्चुकीयेन घोषयति "कस्यार्थः कलशेन......

यद्यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम्।" वासवदत्तया सह यौगन्धरायणः समागत्य तत्र भवर्ती पद् मावर्ती निवेदयति-"इयं मे स्वसा प्रोषितभर्तृका। इमामिच्छामि कञ्चिद्कालं परिपाल्यमानामिति। पद् मावती काञ्चुकीयं कथयति-आर्य उद्घोष्यालं विचारेण, यदेष कथयति तथानुष्ठीयताम्। यौगन्धरायण कृतज्ञतां ज्ञापयति। तस्मिन्नेव काले एकः ब्रह्मचारी समागत्य लावाणके ग्रामेऽग्निदाहेन दग्धां वासवदत्तां विज्ञाप्य तत् चिन्तयोदयनस्योद्विग्नतां वर्णयति। अनन्तरं ब्रह्मचारी राज्ञः उदयनस्य दशां विस्तरेण श्रावयित्वा परिव्राजककाञ्चुकीययोराशीर्वादयुतामाज्ञां प्राप्य निर्गतः। यौगन्धरायणोऽपि पद् मावत्याः गमनाज्ञां लब्ध्वा निर्जगाम।

काञ्चुकीयः पद् मावत्यावन्तिकाभ्यां सह तापसीम् अभिवाद्य शनैरस्तशिखरे गते भगवति भास्करे सर्वैः सह निष्क्रान्तः।

प्रश्न.  - महाकवेर्भासस्य जीवनपरिचयं लिखत।

उत्तर - महाकविभासः जीवनवृत्तं कृतित्वञ्च - महाकविभासस्य जीवनचरितसन्दर्भे न कमपि स्पष्टं विवरणं सम्प्राप्यते। महाकविकालिदासः मालविकाग्निमित्रस्य प्रस्तावनायां (प्रथितयशसां भाससौमिल्ल) इतिभासं सादरं स्मरति। अनेन सिद्ध्यति यदयं कलिदासात् पूर्वमेव नाटककारेषु सुविख्यातः आसीत्। भासस्य नाटकेषु तज्जीवनचरितस्य किमपि स्पष्टं विवरणं न प्राप्यते तथापि, भासः उच्चश्रेण्याः विद्वान् आसीत्। तेन वेदाः, शास्त्राणि, स्मृतयः, काव्यशास्त्राणि, नाट्यशास्त्राणि, दर्शनानि, पुराणानि गंभीरतया अधीतानि। स नाट्यकलायाः ज्ञाता आसीत्, कालिदासेन श्रेष्ठनाटकारत्वेन तस्मै मान्यता प्रदत्ता।

भासस्य नाट्यकृतित्वम् महाकविभासस्य कृतित्वेन साम्प्रतं त्रयोदश (13) नाटकानि समुपलभ्यन्ते। खीताब्दस्य 1909 ईसवीये श्री टी. गणपति शास्त्री महोदयेन त्रावणकोरराज्यात् एतानि नाटकानि प्राप्तानि।

भासनाटकानि कथास्त्रोतदृष्टया चतुर्धा विभक्तुं शक्यते।

(क) उदयन कथा मूलकम्

(1) प्रतिज्ञायौगन्धरायणम् (2) स्वप्नवासवदत्तम्।

(ख) महाभारत मूलकम्

(3) उरुभङ्गम् (4) दूतवाक्यम् (5) पञ्चरात्रम् (6) बालचरितम् (7) दूतघटोत्कचम् (8) कर्णभारम् (9) मध्यमव्यायोगः।

(ग) रामायणमूलकम्

(10) प्रतिमानाटकम् (11) अभिषेकनाटकम्

(घ) कल्पनामूलकम्

(12) अविमारकम् (13) चारुदत्तम्।

एतेषां परिचयः समासतोऽत्र प्रस्तूयते

1. प्रतिज्ञायौगन्धरायणम् - अङ्कचतुष्टयनाटकेऽस्मिन् उदयनस्य वासवदत्तया सह प्रणयः परिणयश्चेह वर्ण्यते।

2. स्वप्नवासवदत्तम् - नाटकेऽस्मिन् अष्टौ अङ्काः वासवदत्ता अग्नौ दग्धेति प्रवादं श्रुत्वा यौगंधरायणप्रयत्नात् पावत्या सह उदयनस्य परिणयोऽपहृतराज्यावाप्तिश्च वर्णिता।

3. दूतवाक्यम् - एकाङ्कीनाटकमिदं महाभारतयुद्धात् प्राक् पाण्डवार्थ दुर्योधनसंसदि दूतत्वेन श्रीकृष्णस्यागमनं वर्णितम्।

4. उरुभङ्गम् - एकाङ्कीनाटकेऽस्मिन् द्रौपदी परिभव-प्रतिक्रिया फलस्वरूपं भीमसेनेन गदायुद्धे दुर्योधनोरुभञ्जनस्य वर्णनमस्ति।

5. पञ्चरात्रम् - त्र्यङ्कयुक्ते नाटकेऽस्मिन् पञ्चरात्र्यभ्यन्तरे पाण्डवानां प्राप्तिः राज्यप्राप्तेश्च वर्णनं विद्यते।

6. बालचरितम् - पञ्चाङ्केषु बालस्य श्रीकृष्णस्य जन्मतः कंसवधान्तं चरितं वर्णितम्।

7. दूतघटोत्कचम् - एकाङ्कीनाटकमिदम् अभिमन्युवधान्तरं घटोत्कचः श्रीकृष्णस्य प्रेरणया दौत्यमङ्गीकरोति।

8. कर्णभारम् - एकाङ्कीनाटकेऽस्मिन् इन्द्रः कर्णं कवचकुण्डलान् याचते।

9. मध्यमव्यायोगः - नाटकमिदम् एकाङ्की। अत्र मध्यमपाण्डवो भीमः मध्यमनामकं ब्राह्मणबालं घटोत्कचेन त्रायते। अन्ते पुत्रेण पत्न्या सह मेलनमपि भवति।

10. प्रतिमानाटकम् - सप्ताङ्कनाटकेऽस्मिन् रामायणी कथा अस्ति अत्र भरतः स्वपितुः दशरथस्य प्रतिमां दृष्ट्वा पितुर्निधनमवगच्छति।

11. अभिषेकनाटकम् - अष्टाङ्कयुक्ते नाटकेऽस्मिन् किष्किन्धाकाण्डादारभ्य रावण वधानन्तरं रामस्य राज्याभिषेकः वर्णितः।

12. अविमारकम् - अङ्कषट्कमत्र। राजकुमारस्य अविमारकस्य कुन्तिभोजस्य पुत्र्या कुरङ्ग्या सह प्रणयपरिणयोऽत्र वर्णितः।

13. चारुदत्तम् - चतुरङ्कयुक्तं नाटकमिदमत्र उदारचित्तस्य चारुदत्तस्य वसन्तसेनया वाराङ्गनया सह प्रणयोपमयम् वर्णितम्।

भासस्य नाट्यकला - समुपलब्धं संस्कृतवाङ्मयमनुशील्यते चेत् प्राप्यते यत् भास एव नाटककारेषु श्रेष्ठः अग्रणीरिति। नाटकानां बाहुल्येन, विषयवैविध्येन च नाट्यकौशलं वैशद्यं च दृश्यते। नाटकेषु तस्य प्रमुख विशेषताः सन्ति भाषासारल्यं, कृत्रिमता रहिता, शैली, वर्णनेषु यथार्थता, घटनासंयोजनसौष्ठवं, कथा प्रसङ्गस्य सरलः प्रवाहः, मौलिकता, कल्पनावैचित्र्यञ्च प्राप्यते।

भाषाशैली : भासस्य शैल्यां माधुर्योजः प्रसादानां त्रयाणां गुणानां समाहारः दृश्यते। भाषा सरला, सुबोधा, सरसा, स्वाभाविकी, सप्रवाहा च । भासः मानवीय मनोवृत्तीनां वर्णने सफलः ।

तद्यथा दुःखं त्युक्तुं बद्धमूलोऽनुरागः स्मृत्वा याति दुःखं नवत्वम्।
यात्रा त्वेषामद् विमुच्येह बाष्पं प्राप्तानृण्या याति बुद्धिः प्रसादम्।। (स्वप्नवास. 4.6)

भासः भारतीयभावानां कविः । तस्य नाटकेषु भावानामुचितं समन्वयः प्राप्यते। यथा पितृभक्तिः, पतिव्रत्यम्, भ्रातृप्रेम, क्षमाशीलता, त्यागादिकञ्च। पातिव्रत्यं वर्ण्यते यथा-

अनुचरति शशाङ्के राहुदोषेऽपि तारा,
पतति न वनवृक्षे याति भूमिं लता च।
त्यजति न च करेणुः पङ्कलग्नं गजेन्द्र
व्रजतु चरतु धर्म भर्तुनाथा हि नार्यः ।। (प्रतिमा 1.25)

भासस्य नाटकानां लोकप्रियतायाः कारणं वर्तते सरसता, सरलता, रम्यता च ।

## दीर्घोत्तरीय प्रश्नोत्तर

प्रश्न. - नाटकस्य लक्षणं लिखत।

उत्तर - नाटकस्य लक्षणम् - नाटकस्य कथावस्तु इतिहासप्रसिद्धं स्यात्। मुखप्रतिमुखादिभिः पञ्चसन्धिभिः युक्तं, विलास-सुख-दुःखादिप्रसङ्गयुक्तं नाटकं भवेत्। नाटके न्यूनातिन्यूनं पञ्च, अधिकाधिकं दश अङ्काः भवेयुः। नाटके प्रख्यातवंशे उत्पन्नः प्रतापी धीरोदात्तः नायकः भवेत्। नाटके मुख्यः रसः वीरः श्रृङ्गारः वा भवेत्, अन्ये रसाः गौणतया निरूपणीयाः। निर्वहणसन्धौ (अन्तभागे, समाप्त्यवसरे) अद्भुतः रसः भवेत्। नाटके कथावस्तु गोपुच्छवत् निरूपणीयम्। यथा अग्रे सूक्ष्मम्, मध्ये विस्तीर्णम्, उपसंहारे च सूक्ष्मम् इति। इत्थं नाटकस्य प्रधानलक्षणानि सन्ति। एतैः लक्षणैः युक्तं रुपकं नाटकम् उच्यते। पञ्चाङ्कं नाटकम् अवरं, सप्ताङ्कं मध्यम तथा दशाङ्कं नाटकं महानाटकम् उच्यते।

प्रश्न - अगतिकन्यायः किं भवति?

उत्तर - अगतिकगतिन्यायः - कस्मिंश्चिद् विषये उपाय एव न भवति चेत् अल्पस्य महतः वा मार्गस्य आधारेण तरणोपायः मार्गणीयः भवति । तदा आश्रयरूपेण स्वीकृतः कियानपि क्षुल्लकः भवतु साधनस्य अपेक्षया समयस्य एव महत्त्वम् अधिकं भवति।

प्रश्न. - निबन्धस्य लक्षणं लिखत।

उत्तर - अथ किंलक्षणः निबन्धो भवति ? उच्यते प्रायः यत्किञ्चित् विषयकः स्पष्टार्थसम्बन्धो गद्यबन्धः निबन्धः इति। वस्तुतः किञ्चिद्विषयमालम्ब्य स्वाभिप्रायस्य स्वविमर्शस्य च लेखेन निबन्धनं निबन्धः इति युज्यते वक्तुम् ।

परमात्रार्थ एवास्य शब्दस्य व्यवहारो न भवति, परन्तु लोकेऽन्यत्राप्ययं शब्दः प्रयुज्यते । यत्र स्वाभिप्रायादिर्नास्ति, केवलं तन्त्रान्तरेभ्यः समाहृत्यैकवस्तुविषयोऽर्थः स्वशब्दैरुच्यते तत्रान्यत्र चेतिवृत्ताख्याने सर्ग सौन्दर्य-वर्णने चेतनाचेतनार्थानाम् आकारादिवर्णने चास्य शब्दस्य प्रयोगस्य दर्शनात्।

प्रश्न - शाकुन्तलस्य मङ्गलपद्यं लिखत। अथवा शिवस्य अष्टौ मूर्तयः विवेचयत।

या सृष्टिः स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री।  
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।  
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः।  
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥

अष्टमूर्तिः शिवः - शिवस्य अष्टमूर्तिविषये पुराणेषु अपि निरूपणं प्राप्यते। ताः अष्टौ मूर्तयः यथा जलम्, अग्निः, यजमानः, सूर्यः, चन्द्रः, आकाशम्, पृथिवी, वायुः इति। एताभिः मूर्तिभिः युक्तः ईश्वरः सर्वान् रक्षतु इति भावः।

प्रश्न - 'सुलभा रम्यता लोके दुर्लभं हि गुणार्जनम्' सूक्ति विवेचनं कुरुत।
उत्तर - लोके अर्थात् अस्मिन् संसारे या रम्यता दृश्यते, सा रम्यता सर्वेभ्यः जनेभ्यः सर्वथा सुलभा भवति। यतो हि सा यदि नास्ति, अल्पतरा वा अस्ति चेत् अनेकैः उपायैः सरलतया प्राप्तुं शक्यते। परन्तु गुणानामर्जनं सरलतया प्राप्तुं न शक्यते तदर्थं तु महान् प्रयत्नः करणीयो भवति। एतत् सुलभत्वं दुर्लभत्वं च मनसि कृत्वा कविनेदं वचः उच्चारितमस्ति।

प्रश्न. - 'याच्या मोघा वरमधिगुणे नाधमे लब्धकामा' सूक्ति विवेचनं कुरुत।
उत्तर - अधिगुणे अर्थात् गुणवति जने कृता याच्ञा - याचना, यदि मोघा अर्थात् निरर्थका भवति, तदापि सा वरम् अस्ति । गुणवति जने याचनाकरणं वरमस्तीत्यभिप्रायः । परन्तु अधमे जने कृता याचना यदि लब्धकामा स्यात् तदापि सा वरं नास्ति । अधमें गुणविहीने जने याच्ञाकरणं वरं नास्तीत्यभिप्रायः ।

प्रश्न. - 'क्षमा हि मूलं सर्व तपसाम्' इत्यस्य आशयं लिखत।
बहुविधानि तपांसि भवन्ति। तेषां सर्वविधानां तपसां मूलं यदि किमपि वर्तते तत् क्षमा अस्ति । सर्वेषां तपसां क्षमामूलरुपमस्ति। नास्ति मूलम् कुतः शाखा इति न्यायेन तपसां मूलं क्षमा एव नास्ति चेत् अन्यानि शाखारूपाणि तपांसि कुतः भवितुमर्हतीति भावः। वस्तुतस्त्वत्र क्रोधवते दुर्वाससे ब्रह्मा क्षमायाः महत्त्वम् उपदिशति। क्षमापूर्वकं ते जीवनं भवेदिति सात्विकीमपेक्षां सेवते इतिदिक् ॥

प्रश्न. - भट्टनारायणः केषां पूर्ववर्ती आसीत्?
उत्तर - भट्टनारायणस्य एकमेव नाटकं वेणीसंहारम् उपलभ्यते। वेणीसंहारे भट्टनारायणः स्वविषये केवलं 'कविः मृगराजलक्ष्मा' इति लिखति। एतत्कथ्यते यत् भट्टनारायणः कान्यकुब्जीयः ब्राह्मणः आसीत्। बङ्गप्रदेशस्य राजा यज्ञार्थ कान्यकुब्जात् काँश्चन ब्राह्मणान् आहूतवान्, तेषु ब्राह्मणेषु भट्टनारायणोऽपि आसीत्। अस्य राज्ञः नाम आदिशूरः आसीत्।

भट्टनारायणः नाम्नः अग्रे भट्टः इति योजयति तथा आत्मानं मृगराजलक्ष्मा इति कथयति अतः ज्ञायते यत् एषः पराक्रमी वीरः ब्राह्मणः स्यात्।
आचार्यः वामनः, आनन्दवर्धनः, दण्डी च भट्टनारायणं स्मरन्ति स्वीयग्रन्थेषु, अतः भट्टनारायणः तेभ्यः पूर्ववर्ती स्यात् इति मन्यते।

प्रश्न. - 'क्षणे-क्षणे यन्नवताम् उपैति तदेव रूपं रमणीयतायाः' सूक्ति विवेचनं कुरुत।
उत्तर - का नाम रमणीयता इति प्रश्ने इयमुक्तिः उत्तरम् । यद्वस्तु प्रतिक्षणं नावीन्यं भजते तदेव वस्तु रमणीयम् भवति । प्रतिदिनं सूर्योदयः भवति । परं यः खलु सूर्योदयस्य दर्शनं करोति सः प्रतिदिनं सूर्योदयस्य नवीनां नवीनाम् अनुभूतिं करोति । अर्थात् स एव सूर्यः प्रातःकाले पुनः पुनः उदयं गच्छन् तद्दर्शकानां कृते नवीनमिव प्रतीयते।

प्रश्न. - दशकुमारचरितस्य कथावस्तुः लेख्यः।
उत्तर - दशकुमारचरिते द्वे पीठिके स्तः। (1) पूर्वपीठिका (2) उत्तरपीठिका च। पूर्वपीठिकायां पञ्च उच्छ्वासाः निरूपिताः सन्ति उत्तरपीठिकायां च अष्टौ उच्छ्वासाः वर्णिताः सन्ति। मगधदेशस्य पुष्पावतीनामिकायां नगर्यां राजहंसनामा कश्चित् नृपः राज्यशासनं करोति स्म । अस्य राज्ञः धर्मपालः पोद्भवः सितवर्मा चेति त्रयः मन्त्रिणः आसन्। एषु मन्त्रिषु धर्मपालस्य त्रयः, पोद्भवस्य द्वौ सितवर्मणश्च द्वौ इति सम्मिल्य सप्त मन्त्रिपुत्राः आसन्। गच्छता कालेन राजहंसस्य एकः पुत्रः समुत्पन्नः। तस्य नाम राजवाहनः आसीत्। एकदा वामदेवनामकेन ऋषिणा राजवाहनः दिग्विजयाय प्रयाणं कुर्यादिति राजहंसः प्रेरितः। ऋषिप्रेरितः पिता राजहंसः अन्यैः नवकुमारैः सह स्वीयं पुत्रं राजवाहनं दिग्विजयाय प्रेषितवान्। पूर्वमेते सङ्गत्यैव यात्रारताः आसन्। परन्तु अल्पीयसा कालेनैवैते परस्परं विभक्ताः जाताः। बहुकालानन्तरं पुनस्ते विभिन्नासु दिशासु परिभ्रमणं कृत्वा विविधान् नवनवान् अनुभवान् कृत्वा प्रत्यागताः। यात्रातः प्रतिनिवृत्ताः एते स्वीयान् स्वीयान् अनुभवान् घटिताः घटनाः परस्परं श्रावयन्ति। यतो हि कुमाराः दश आसन् अतः दशकुमारचरितेऽस्मिन् कथाः अपि दश एव सन्ति। दशभिः कुमारैः कथितायाः कथायाः क्रमः एतादृशो वर्तते - प्रथमा सोमदत्तस्य कथा। द्वितीया पुष्पोद्भवस्य कथा। तृतीया राजवाहनस्य पराक्रमस्य कथा। चतुर्थी प्रहारवर्मणः पुत्रस्य अपहारवर्मणः कथा। पञ्चमी अपहारवर्मणः भ्रातुः उपहारवर्मणः कथा। षष्ठी अर्थपालस्य कथा। सप्तमी प्रमतेः कथा । अष्टमी मित्रस्य कथा। अस्यां कथायां

धूमिनी-गोमिनी-निम्बवती-नितम्बवतीनां कथाः अपि समागच्छन्ति। नवमी मन्त्रगुप्तस्य कथा। अन्ते दशमी कथा विश्रुतस्य वर्तते॥

प्रश्न. - 'स्वप्नवासवदत्तम्' इत्याख्यनाटकस्य पञ्चमाङ्कस्य सारांशो लेख्यः।

उत्तर - 'स्वप्नवासवदत्तम्' इत्याख्यनाटकस्य पञ्चमोऽङ्कः -

पञ्चमेऽङ्के प्रवेशके पनिका मधुरिका च आगच्छतः तयोः वार्तालापेन ज्ञायते यत् पद् मावती शिरोवेदनया दुःखितास्ति । तस्या शय्या समुद्रगृहके स्तीर्णा अस्ति पनिका मधुरिकां आवन्तिकायाः आह्वानाय कथयति। येन सा पद् मावत्या शिरोवेदनां मधुराभिः कथाभिः दूरी करिष्यति, मधुरिका तावत् आवन्तिकाम् अन्विष्यति पनिका तु विदूषकम् आर्य वसन्तकम्। विदूषकं प्राप्य सा तत्रभवत्याः पद् मावत्याः शिरोवेदनां निवेदयति उदयनेन सह तं पद् मावत्या पाश्र्वे गमनाय निवेद्य सा तावद् शिरोवेदनोपचरार्थलेपनार्थ त्वरयति। विदूषकः राजानमुदयनं निवेदयितुं प्रस्थितः।

तदनन्तरं मञ्चे उदययनस्य प्रवेशः। चिन्तामग्नं राजनं विदूषकः कथयति त्वरतां, त्वरतां तावद्भवान्, यतो हि तत्रभवती पद् मावती शिरोवेदनया दुःखितेति। एतच्छ्रुत्वा उदयनः समुद्रगृहकं प्रविशति।

तत्र च पद् मावतीं न दृष्ट्वा तत्रैव प्रतीक्षारतोऽभवत्। विदूषकः राजा कथां श्रवयति तदैव राजा उदयनः स्वपिति, विदूषकश्च बहिर्गच्छति। तदैवावन्तिका पद् मावती द्रष्टुं समागच्छति। आवन्तिका सुप्तमुदयनं पद् मावर्ती मन्यमाना तस्यामेव शय्यायां स्वयमपि स्वपिति। स्वप्ने उदयनः वासवदत्तां प्रलपति। तदा किन्नु दृष्टास्मि उदयनेनेति विचिन्त्य भीता वासवदत्ता शयनाद् तस्मादुत्थाय गन्तुं तत्पराऽभवत् तदैव राज्ञा पुनः स्वप्नायितं तद् ज्ञात्वा आश्वस्ता वासवदत्ता प्रलम्बितं शय्यातः आर्यपुत्रस्य हस्तं यदा शय्यायामारोप्य गन्तुमिच्छति तदैव तस्य निद्राभङ्गो जातः तदा शय्यातः सहसा उत्थाय राजा निष्क्रमर्ती वासवदत्तां पश्यति कथयति च तिष्ठ तिष्ठ। अथ च "धावन् द्वारिपक्षेण ताडितः। तदैव विदूषकः आगच्छति कथयति च सा वासवदत्ता चिरात् मृता स्वप्ने भवता दृष्टा। तदा काञ्चुकीयः प्रविश्य कथयति अस्माकं महाराजो दर्शको भवन्तमाह खलु भवतोऽमात्यो बलसमुदायेनोपनीतः आरुणिमुपघातयितुम् ।

राजा उदयनः उत्थाय कथयति-

"उपेन्द्र नागेन्द्रतुरङ्गतीर्णे तमारुणिं दारुणकर्म दक्षम्।

विकीर्णवाणोग्रतरङ्गभङ्गे महार्णवाभे युधिनाशयामि ॥"

प्रश्न. 28 - महाकविभारवेः जीवनवृत्तं कृतित्वञ्च लिखत।

कवि परिचयः - महाकवि भारविः

भारवेः जन्मनाम दामोदरः । एतस्य पिता नारायणस्वामी । दामोदरः चालुक्यराजस्य विष्णुवर्धनस्य मित्रम् आसीत्। कौशिकगोत्रोत्पन्नस्य भारवेः पूर्वजाः पूरा उत्तरपश्चिमभारतान्तर्गतमानन्दपुरं नाम नगरमध्यवात्सुः परतश्च ते नासिकनामकं दक्षिणभारतनगरमायाताः ।

अवन्तिसुन्दरीकथायामस्य कवेः विषये एका कथोल्लिखितास्ति । एकदा स्वसमकालिकेन राजकुमारेण विष्णुवर्धनेन समं मृगयायां घोरं काननमुपेतो भारविः मांसं सिषेवे, तत्पापापनोदनाय स तीर्थानि बभ्राम । तदीयं काव्यं श्रुत्वा काञ्चीनृपः सिंहविष्णुस्तमात्मराजधानीमानाययत् । सिंहविष्णुतनयेन राजकुमार-महेन्द्र विक्रमेण स तत्र सानन्दमुवास । तस्य पुत्रो मनोरथनामाऽसीत् । तस्य प्रपौत्रः दण्डी बभूव ।

एवं मन्यते यदयं कविः ख्रिस्तस्य षष्ठे शतके सञ्जातः । भारविरिति नाम ऐहोलः शिलालेखे निम्नलिखितरूपेण प्राप्यते-

येनायोजि नवेऽश्मस्थिरमर्थविधौ विवेकिना जिनवेश्म । स विजयतां रविकीर्तिः कविताश्रितकालिदासभारविकीर्तिः ॥

अयं पुलकेशिनो द्वितीयस्य 634 ई. सामयिकः शिलालेखः, अतो भारविस्तत्पूर्वतनः सम्भवति। कतिपये पण्डितास्तु बाणेन हर्षचरिते स्वपूर्ववर्तिकविप्रसङ्गे भारविः नैव स्मृतोऽस्तीति हेतुना तेन बाणपरवर्तिना भाव्यमित्यपि निर्दिशन्ति ।

न केवलं स्थितिकालस्यापि तु कवेरस्य देशविषयेऽपि तथैवान्धकारो विद्यते । राजशेखरानुसारेणाऽसौ विशालायां परीक्षित आसीत् किन्तु नैतावताऽस्य देशो निर्णेतुं शक्यते। अधिकांशतः पण्डिता अमुं दाक्षिणात्यं मन्यन्ते, किन्तु अस्य शरद्धिमालययोर्वर्णनं तु कविममुमौत्तरीयमेव सूचयति । अस्य हि सह्याद्रिप्रसंगमालोक्य केचित्तं महाराष्ट्रीयं मन्यन्तेऽन्ये तु तद्वाग्युक्तिमेव मन्यन्ते।

भारवेरर्थगौरवं प्रसिद्धम् । अत एव मल्लिनाथोऽपि टीकायाः प्रारम्भे नारिकेलफलसम्मितं वचो भारवेरित्याह । बहोरप्यर्थराशेरल्पेन शब्देनाभिधाने भारविरभ्यस्तकौशल इति सर्वेषां विदुषां विचारः । 'हितं मनोहारि च दुर्लभं वचः' 'सहसा विदधीत न क्रियाम्' इत्यादयः तस्य प्रयोगाः एतमभिप्रायं समर्थयन्ति । 'भारवेः अर्थगौरवम्' इत्युक्तिरपि विमर्शकलोके प्रसिद्धा।

एकमेव महाकाव्यं लिखित्वा अपि भारविः स्वकवित्वेन, पाण्डित्येन, वर्णनकौशलेन च कविप्रपञ्चे विशिष्टं स्थानं प्राप्तवान् ।

## अन्य महत्वपूर्ण प्रश्नोत्तर स्वप्नवासवदत्तम्

प्रश्न :--- स्वप्नवासवदत्तम् के लेखक कौन हैं ?

कालिदास

भास

भवभूति

राजशेखर

उत्तर :--- भास

प्रश्न :--- स्वप्नवासवदत्तम् में कितने अङ्क हैं ?

5

6

7

8

उत्तर :--- ६

प्रश्न :--- उदयन किस कोटि का नायक है ?

धीरोदात्त

धीरोधत्त

धीरललित

धीरप्रशान्त

उत्तर :--- धीरललित

प्रश्न :--- उदयन के सेनापति का क्या नाम है ?

आरुणि

रुमण्वान

यौगन्धरायण

प्रद्योत

उत्तर :--- रुमण्वान।

प्रश्न :--- स्वप्नवासवदत्तम् के विदूषक का क्या नाम है ?

वसंतक

कामन्दक

मकरन्द

माध्वय

उत्तर :--- वसन्तक

प्रश्न :--- वासवदत्ता कहाँ की राजकन्या थी ?

अवन्ती

मगधस्य

कौशाम्बी

गांधार

उत्तर :--- अवन्ती

प्रश्न :--- स्वप्वासवदत्तम् में सर्वाधिक प्रयुक्त छंद है ?

अनुष्टुप

आर्या

बसन्ततिलका

वंशस्थ

उत्तर :--- आर्या

प्रश्न :--- लगभग कितने श्लोकों में अनुष्टुप छंद प्रयुक्त हुआ है ?

19

28

16

22

उत्तर :--- २२

प्रश्न :--- रभ्य कौन है ?

उदयन का सेवक

उदयन का कंचुकी

प्रद्योत का सेवक

प्रद्योत का कंचुकी

उत्तर :--- प्रद्योत का कञ्चुकी

प्रश्न :--- दर्शक कौन है ?

पद् मावती का भाई

पद् मावती का सेवक

पद् मावती का द्वारपाल

उदयन का सेवक

उत्तर :--- पद् मावती का भाई

प्रश्न :--- पद् मावती के बारे में यौगन्धरायण को कौन बताता है ?

पुष्पक

भद्र

पुष्पक और भद्र

वासवदत्ता

उत्तर :--- पुष्पक और भद्र

प्रश्न :--- पुष्पक और भद्र कौन हैं ?

ज्योतिषी

गुप्तचर

सेवक

द्वारपाल

उत्तर :--- ज्योतिषी

प्रश्न :--- अग्निकांड कहाँ होता है ?

लावाणक ग्राम में

उद्यान में

अन्तः पुर में

राजदरबार में

उत्तर :--- लावाणक ग्राम

प्रश्न :--- पद् मावती के कन्दुक क्रीड़ा का वर्णन किस अंक में है ?

प्रथम

द्वितीय

तृतीय

चतुर्थ

उत्तर :--- द्वितीय

प्रश्न :--- वासवदत्ता और पद् मावती के प्रमदवन में वार्तालाप का वर्णन किस अंक में है ?

प्रथम

द्वितीय

तृतीय

चतुर्थ

उत्तर :--- चतुर्थ

प्रश्न :--- उदयन के आने पर वे दोनों कहाँ छिपती हैं ?

मालतीकुंज

माधविलताकुंज

अन्तःपुर

उद्यान

उत्तर :--- माधवी लता कुञ्ज

प्रश्न :--- दर्शक कहाँ का राजा था ?

मगध

राजगिरि

उज्जयिनी

पाटिलीपुत्र

उत्तर :--- मगध

प्रश्न :--- वत्सदेश का राजा कौन था ?

उदयन

प्रद्योत

बसंतक

आरुणि

उत्तर :---उदयन

प्रश्न :--- समुद्रग्रह किसका आवास है ?

वासवदत्ता

पद् मावती

अंगारवती

उदयन

उत्तर :---पद् मावती

प्रश्न :--- सूर्यमुख किसके आवास का नाम है ?

पद् मावती

उदयन

वासवदत्ता

अंगारवती

उत्तर :--- उदयन

प्रश्न :--- मिश्रविषकम्भक किस अंक में है ?

प्रथम

द्वितीय

तृतीय

षष्ठ

उत्तर :---षष्ठ

प्रश्न :--- पद् मावती की शिरोवेदना का वर्णन किस अंक में है ?

चतुर्थ

पंचम

षष्ठ

तृतीय

उत्तर :---पञ्चम

प्रश्न :--- कौन दो अंक मात्र गद्य आधारित हैं ?

प्रथम तृतीय

द्वितीय, तृतीय

तृतीय चतुर्थ

चतुर्थ पंचम

उत्तर :---द्वितीय और तृतीय

प्रश्न :--- किस अंक को स्वप्न अंक कहा जाता है ?

तृतीय

चतुर्थ

पंचम

षष्ठ

उत्तर :---पञ्चम

प्रश्न :--- महासेन किसका विशेषण है ?

आरुणि

प्रद्योत

उदयन

बसंतक

उत्तर :---प्रद्योत

प्रश्न :--- लावाणक ग्राम की घटना किस अंक में वर्णित है ?

प्रथम

द्वितीय

तृतीय

चतुर्थ

उत्तर :---प्रथम

प्रश्न :--- मंगलाचरण में कौन सा छंद है ?

आर्या

वंशस्थ

बसन्ततिलका

अनुष्टुप

उत्तर :--- आर्या

प्रश्न :--- सम्भषक कौन है ?

वासवदत्ता का सेवक

पद् मावती का सेवक

उदयन का सेवक

उदयन का गुप्तचर

उत्तर :---पद् मावती का सेवक

प्रश्न :--- वत्सराज की प्रतिहारी का क्या नाम है ?

अंगारवती

महादेवी

वसुंधरा

**विजया**

**उत्तर :--- विजया**

**प्रश्न :--- वैदेही कौन है ?**

**उदयन की माता**

**बसंतक की माता**

**आरुणि की माता**

**दर्शक की माता**

**उत्तर :--- दर्शक की माता**

**प्रश्न :--- मंगलाचरण में किसकी स्तुति की गई है ?**

**राम**

**कृष्ण**

**विष्णु**

**बलराम**

**उत्तर :---बलराम**

**प्रश्न :--- घोषवती क्या है ?**

**वीणा**

**सेविका**

**प्रतिहारी**

**कंचुकी**

**उत्तर :--- वीणा**